# Radha Ashtakam

# राधाष्टकम्

## Document Information

Text title : Radha Ashtakam 3

File name : rAdhAShTakam3.itx

Category : devii, aShTaka, rAdhA, nimbArkAchArya, devI

Location : doc_devii

Author : Nimbarkacharya

Latest update : January 13, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# राधाष्टकम्

नमस्ते श्रियै राधिकायै परायै
नमस्ते नमस्ते मुकुन्दप्रियायै ।
सदानन्दरूपे प्रसीद त्वमन्तः-
प्रकाशे स्फुरन्ती मुकुन्देन सार्धम् ॥ १॥

स्ववासोपहारं यशोदासुतं वा
स्वदध्यादिचौरं समाराधयन्तीम् ।
स्वदाम्नोदरे या बबन्धाशु नीव्या
प्रपद्ये नु दामोदरप्रेयसीं ताम् ॥ २॥

दुराराध्यमाराध्य कृष्णं वशे तं
महाप्रेमपूरेण राधाभिधाभूः ।
स्वयं नामकीर्त्या हरौ प्रेम यच्छत्
प्रपन्नाय मे कृष्णरूपे समक्षम् ॥ ३॥

मुकुन्दस्त्वया प्रेमडोरेण बद्धः
पतङ्गो यथा त्वामनुभ्राम्यमाणः ।
उपक्रीडयन् हार्दमेवानुगच्छन्
कृपावर्तते कारयातो मयीष्टिम् ॥ ४॥

व्रजन्तीं स्ववृन्दावने नित्यकालं
मुकुन्देन साकं विधायाङ्कमालाम् ।
समामोक्ष्यमाणानुकम्पाकटाक्षैः
श्रियं चिन्तये सच्चिदानन्दरूपाम् ॥ ५॥

मुकुन्दानुरागेण रोमाञ्चिताङ्गै-
रहं वेप्यमानां तनुस्वेदबिन्दुम् ।
महाहार्दवृष्ट्या कृपापाङ्गदृष्ट्या
समालोकयन्तीं कदा मां विचक्षे ॥ ६॥

यद् अङ्कावलोके महालालसौघं
    मुकुन्दः करोति स्वयं ध्येयपादः ।
पदं राधिके ते सदा दर्शयान्तर्-
    हृदिस्थं नमन्तं किरद्रोचिषं माम् ॥ ७॥

सदा राधिकानाम जिह्वाग्रतः स्यात्
    सदा राधिकारूपमक्ष्यग्र आस्ताम् ।
श्रुतौ राधिकाकीर्तिरन्तःस्वभावे
    गुणा राधिकायाः श्रिया एतद् ईहे ॥ ८॥

इदं त्वष्टकं राधिकायाः प्रियायाः
    पठेयुः सदैवं हि दामोदरस्य ।
सुतिष्ठन्ति वृन्दावने कृष्णधाम्नि
    सखीमूर्तयो युग्मसेवानुकूलाः ॥ ९॥

इति श्रीनिम्बार्काचार्यविरचितम् राधाष्टकं सम्पूर्णम् ।

*Radha Ashtakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*